यत्रास्य शक्तिर्नियतास्ति तावत्यर्थे स्थितं चेद् भवति प्रमाणम्॥ - Ibid., 58

413. सत्तावतो ज्ञानमिहोपलब्धिर्ज्ञातस्य सत्ताप्युपलब्धिरन्या।
यस्योपलब्धिस्तदवैमि सत्यं सत्यं यतो बुध्यति तत् प्रमाणम्॥ - Ibid., 62

414. प्रमाणमेव व्यवहारकल्पे दोषात् कुतश्चिन्मतमप्रमाणम्।
अवग्रहे त्विन्द्रियदोषतोऽस्त्यप्रमाणमीहासु मनःस्थदोषात्॥ - Ibid., 65

415. इत्थं व्यवस्थां कुरुते प्रमाणाप्रमाणयोर्यद्व्यवहारतस्तत्।
लोके नियुक्तं परमार्थतस्तु ज्ञानं प्रमाणं हि सदा स्वरूपात्॥ - Ibid., 68

416. स्यादप्रमाणं यदि चेदपूर्णं तर्ह्यप्रमाणं प्रभवेत् समस्तम्।
सर्वं ह्यपूर्णं च सदोषमेतन्नास्त्यप्रमाणं न ततोऽनृतं वा॥ - Ibid., 70
अपूर्णतायामपि यावदस्ति ज्ञानं ध्रुवं तावदिह प्रमाणम्।
अत्यल्पमध्वक्तमनल्पमम्भो मिष्टं न चेत् तन्मधुनास्त्यमिष्टम्॥ - Ibid., 71

## METAPHYSICS

There is much difference of opinion about such metaphysical concepts as God, self and universe. The *Buddhist,* believe in transitory nature of existence. They do not accept God. They do not believe in a permanent substratum of consciousness.[417] The *Vaiśeṣikas* believe that universe is a collection of atoms, qualities, activities, generic and particulars.[418] The generic is caused by substance, qualities and activities. The particular is caused by shape, size and category. The universe consists of the generic and the particular,[419] particularly the *ātmā* in itself is unconscious but when it joins with *buddhi* it becomes conscious. The universe is real.[420]

According to *Sāṃkhya, prakṛti* is unconscious and the universe emerges out of *prakṛti. Puruṣa* is conscious but it does not play any role in creation.[421] The *Sāṃkhya* does not believe in God.[422]

---

417. असद्धि तत्त्वं किमपीदमस्मादसत् समस्तं जगदुद्बभूव।

प्रवाहि कर्म्मास्थिरमस्त्यचित् तच्चैतन्यमप्यस्ति हि कर्मरूपम्।। - तत्त्वदर्शनसन्दर्भक्रम:, 1

418. द्रव्यगुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानान्निश्रेयसम् - वैशेषिक सूत्र 1.1.4

419. द्रव्यं विशिष्टं तु गुणक्रियाभ्यां सत् तस्य सामान्यविशेषरूपा।

सत्ता तया यत् समवेतरूपं द्रव्यं तत: कार्य्यमिदं जगत् सत्।। - Ibid., 3

420. वैशेषिको वाद इति द्वितीयस्तत्राचिदेवास्त्यखिलं पृथग्वत्।

गुणैस्तु बुद्ध्यादिभिरस्त्यचिद्भिर्द्रव्यं विशिष्टं खलु चेतनात्मा।। - Ibid., 4

421. तृतीयवाद: पुनरत्र सांख्यो द्वे तत्र तत्वे चिदचित्स्वरूपे।

अचिज्जगद् व्यक्तमभूदचित्तोऽव्यक्तादियं चित् पुनरस्य भोक्त्री। - Ibid., 5

422. पश्यन्ति न त्वीश्वरमत्र वादे सर्वं प्रकृत्यैव जगद्विधानम्।

योगात्मक: कर्म्मविशेष एवोपास्तिर्न चेश: फलद: कृपात:।। - Ibid., 6

According to *Pandita Madhusudan Ojha* we have unconscious, conscious and God. All these three together are called *Brahman* who is existent, conscious, and blissful.[423]

**SELF**

Out of these three, *ātmā* consists of mind which desires, *prāṇa* which operates through *tapas* and *Vāk* which has physical activity. Our experience shows that we have knowledge. The substratum of this knowledge is the self.[424] The knowledge of God illuminates the whole universe.[425] Knowledge supports intelligence, memory and retaining power etc.[426] Knowledge reaches our mental screen through the senses. The various organs of senses function independently which are co-ordinated by one entity which is self.[427] the knowledge of *ātmā* is absent in deep sleep or when we become unconscious. Some say that this proves that the knowledge of the self is not permanent.[428] The answer is that knowledge without objects is always present in us. The knowledge of objects is temporary. In deep sleep also we have knowledge but without

---

423. अचिच्च चिच्चास्ति तथेश्वरश्च त्रितत्त्वमेतद् भवति त्रिसत्यम्।
अचिच्चिदीशानविशिष्टरूपं ब्रह्मास्ति तज्जं जगदप्यनन्यत्॥ - Ibid., 8

424. यदेतदाभाति निगूहितुं तन्न शक्यते स्वानुभवैकमानात्।
संभाव्यते नैतदमूलस्य क्वान्यत्र मूलं वद मद्विना स्यात्॥ - ज्ञानौपयिकजीवसिद्धिः, 1

425. लोके यथा वस्त्ववभासमूलप्रभामहामण्डलमूलमेषः।
सूर्य्योऽन्तरे तिष्ठति तद्वदत्राप्यहं जगज्ज्ञानविकाशमूलम्॥ - Ibid., 2

426. ज्ञानं प्रकाशो रविवद् द्विधाङ्गं यत् कन्दलं ज्ञानमयं स आत्मा।
ये रश्मयेऽस्त्यात्मगुणः स तेभ्यो ज्ञाने विशेषाः स्युरिहेन्द्रियोत्था॥ - Ibid., 3

427. दर्शनेन यावदर्थो गृहीतः स्पर्शनेनापि सोऽर्थो गृह्यते।
यमहमद्राक्षं चक्षुषा तं स्पर्शनेनापि स्पृशामि इति।
एकविषयौ चेमौ प्रत्ययौ एककर्तृकौ प्रतिसंधीयते॥
(न्यायभाष्यम्) Quoted on Ibid., p. 271 (f.n.)

428. तस्माद् ध्रुवम् यौगिकमिन्द्रियोत्थं मन्यामहे ज्ञानमनेकमूलम्।
अर्थेन्द्रियस्नायुविशिष्टयोगात् तात्कालिकं तद्भवति प्रभास्वत्॥ - Ibid., 8
तैलाग्निवर्त्यादिविशिष्टयोगाद्दीपार्चिरुत्पद्य विभाति यद्वत्।
तात्कालिकं ज्ञानमुदेति तद्वत् प्रवाहि कालेन विपद्यते तत्॥ - Ibid., 9

objects.[429] The objects are received through senses.[430] Thus we come to the conclusion that there is one entity which is eye and which knows the nature of things. It is *ātmā* which decides the truth.[431]

The second constituent of self is action. We decide which activity is good or bad for me.[432] When a thorn pricks me, my hand immediately comes into action and we remove the thorn. This action is taken by my self.[433] There is warmth in our body which is the function of *vaiśvānarāgni.* Similar is the function on of *vāyu.* The brightness in the eyes is the function of *āditya. Āditya* resides in the head, *vāyu* in the chest and the *agni* in the belly which are respectively called cavities of head, chest and belly.[434] These three have the essence of the three regions. *Indra* has the essence of heaven, *vāyu* of atmosphere and *agni* of earth. All these are supported by *ātmā* which co-ordinates their functioning. *Indra* produces knowledge, *vāyu* produces activities and *agni* produces the body.[435] *Kenopaniṣad* says that these three are supported by *brahman. Chāndogya* and *Bṛhadaraṇyaka Upanisad* also testify that there is a self which controls *indra, vāyu* and *agni,* activates the senses, acquires knowledge through senses and it is, therefore, called ear of ear, mind of mind etc. Without self no sense can function. All senses serve the cause of the self.

---

429. ज्ञानं द्विधा निर्विषयं निरूढं स्याद् यौगिकं वैषयिकं तदन्यत्।
अर्थाद्ययोगे तु यदद्वयं तन्न पश्यति द्रष्ट्रपि मुग्धदृग्वत्॥ - Ibid., 11

430. बाह्यार्थयोगादनुभूतिसंज्ञं संस्कारयोगात् स्मृतिसंज्ञमित्थम्।
ज्ञानं द्विधात्मा सृजतीह शून्यं ज्ञानं सुषुप्तावथ शून्ययोगात्॥ - Ibid., 13

431. यो निर्णयं संशयमाप्नुवन् वा तं तं च सत्यापयमान आह।
सत्यत्वमायति यतस्तदर्थैः सत्यात्मना तिष्ठति यः स आत्मा॥ - Ibid., 16

432. क्रियाविधौ यच्छ्रमजन्म दुःखं ततोऽधिकं कर्मफलं सुखं चेत्।
तदैष तत्कर्म करोति दुःखाधिक्ये तु तस्माद्विनिवर्तते सः॥ - Ibid., 20

433. वक्तुर्यतो वाचि बलं पुरस्तादुत्थाय संसज्जत एष आत्मा।
यन्मक्षिका निष्पवने परागात् सास्याः क्रियोदेति यतःस आत्मा॥ - Ibid., 23

434. शिरो गुहामिन्द्र उरोगुहामयं वायुर्गुहामग्निरयं तथौदरीम्।
देहेऽधितिष्ठन् स्वपुरीमिवाखिलं देहं प्रशास्त्येष पराविरोधतः॥
- ज्ञानक्रियार्थमूलानामिन्द्रवाय्वग्नीनां तद्भिन्नात्माश्रितत्वम्, 27

435. ज्ञानानि चेष्टा अपि धातवोऽमी त्रिभिस्त्वमीभिः कृत एष कायः।
त इन्द्रवाय्वग्निकृता हि भावास्त्रयस्त्वमी ब्रह्मणि सन्ति बद्धाः॥ - Ibid., 31

Out of these three *indra* is the chief *prāṇa*. It is because of *Indra prāṇa* that our mind and intellect function. It is *indra* which differentiates men from vegetables and minerals.

The reflection of consciousness in association with body is called *jīva*.[436] The system undergoes change constantly but there is something permanent underlying the change. This is known as *ātmā*.[437]

The knower is true the known object is also true. Out of the three -- knowledge, knowner and known -- if one is true all the three are true.[438] In fact *ātmā* is also known. If knowledge were to be false, even *ātmā* would be false.[439] The universe is known. If knowledge is true the universe must also be true.[440]

## JĪVA

There is difference between one individual and another individual. One is sad, another is happy. It proves that there are many individuals.[441] Each individual has his own concept of universe.[442] Therefore we have different experiences. If there is day in India there

---

436. केचिद्विदुः कुर्वदिहास्ति किञ्चिद्रूपं शरीरे प्रभवः स आत्मा।
स्थिति-स्वभावं तु यदस्ति रूपं जगत् तदाहुर्वपुरात्मनस्तत्॥ - जीवस्वरूपनिष्कर्षः, 33

437. कुर्वत्सु नित्यं परिवर्तमानेष्वसत्स्वकर्म ध्रुवमस्ति किञ्चित्।
अन्तर्निगूढं सदनंतशान्तं विज्ञानमानन्दमहं स आत्मा॥ - Ibid., 35

438. संप्रत्ययो न त्रिविधिः स एको, मिथ्या स चेन्नात्मनि सत्यता स्यात्।
सत्यः स चेद् वेतृवदेव वित्तिर्वेद्यानि सत्यान्यपि संभवेयुः॥
- त्रिपुटीसंप्रत्ययैकत्वाद् ज्ञातृवद् ज्ञेयजगत्सिद्धिः, 38

439. ज्ञातापि स ज्ञेयतयैव भाव्यो न ज्ञायते यत्र तदस्ति नाम।
ज्ञेयेष्वहं केवलमस्मि सत्यं मिथ्येतराणीति कथं प्रतीयाम्॥
- ज्ञेयत्वसामान्याद् ज्ञातुरिव ज्ञेयजगत्सिद्धिः, 39

440. संप्रत्ययो विश्वमयस्वरूपः स्वतः प्रमाणं सदबाधितत्वात्।
प्रमाणसिद्धं सकलं तु वेद्यं न चापलापाय कदापि शक्यम्॥
- संप्रत्ययप्रामाण्याद् ज्ञेयजगत्सिद्धिः, 40

441. वेद्येषु पश्यामि तु मामिवान्यान् मत्तुल्यधर्म्मव्यवहारभाजः।
मत्तश्च पार्थक्यममीषु पश्याम्यनेकजीवत्वमतः प्रपद्ये॥ - जीवानन्त्यसिद्धिः, 41

442. सिद्धं तदित्थं बहवो वयं स्मो न त्वेकतन्त्र्यं विनिगन्तुमर्हम्।
प्रत्यात्मविद्धानि जमन्ति भिन्नान्येकस्य चार्था न परत्र भान्ति॥ जगदानन्त्यसिद्धिः, 45

is night in America.[443] If some one is happy the other is sad.[444] We get knowledge because the object exists. Even if a blind man does not see color, it does not mean that color does not exist.[445] Therefore the universe is not the projection of our mind.[446] Therefore if every individual has his own concept of universe we cannot say that there are many universe.[447]

**UNIVERSE**

The matter of the fact is that there are two types of universe - the external universe and the conceptual universe. The external universe is one, because, God, whose internal universe it is, is one. The conceptual universe are many, because of multiplicity of individual.[448]

The object has three aspects - the body, the aura and the concept. We can touch the body which is *vāk*, we can see the aura which is *prāṇa* and we can conceive the concept which is *manas*.[449] The body is the external world, the concept is the internal world.[450]

---

443. पश्यन्ति भास्वन्तमिहैककाले प्रोद्यन्तमेकेऽस्तमयन्तमेके।
मन्दप्रभं विस्तृतबिम्बमन्ये मध्याह्नगं दीप्तभमल्पबिम्बम्॥ - Ibid., 48

444. कस्यापि चानन्दमयं जगत् स्यादबाधितोपस्थितभोग्यभाजः।
दीनस्य तद्दुःखमयं जगत् स्यात् स्त्रीपुत्रमित्रैरपि धिक्कृतस्य॥ - Ibid., 49

445. न वेद्मि तस्मादिदमस्ति किन्तु स्वतस्तदस्तीत्यहमत्र वेद्मि
न ज्ञाननिघ्नाऽखिलवस्तुसत्ता सत्तावशात् किन्त्विह वस्तुबुद्धिः॥
- सत्ताज्ञानाभ्यं जगद्वैविध्ये ज्ञानतो जगदानन्त्ये आक्षेपः, 52

446. पृथ्वीन्दुसूर्य्या अपि तारकास्ताः सन्ति स्वतन्त्रता न तु बुद्धिजन्याः।
तमस्युपाघातवशात्तु वस्तु प्रत्येमि न प्रत्ययपूर्वकं तत्॥ - Ibid., 53

447. इत्थं बहिःस्थस्य ममेन्द्रियेण स्पर्शाद् यदि ज्ञानमिहोपपन्नम्।
तदा वृथान्तर्जगतः प्रक्लृप्तिर्दूरे तदानन्यमिदं त्वपास्तम्॥ - Ibid., 58

448. अत्रोच्यते केवलमस्ति सत्तासिद्धं न सर्वं जगदप्रतीतेः।
तद् भातिसिद्धं पृथगस्ति, सत्तासिद्धं पृथक् चेति जगद् द्विधास्ति॥ आक्षेपनिरासः, 59

449. यद् दृश्यते तत् त्रितयं समुच्चितं निगीर्णभेदं जगदेकतां गतम्।
मनोमयं प्राणमयं च वाङ्मयं शास्त्रैकदृष्ट्या तु पृथक्त्वमीक्ष्यते॥ - Ibid., 61
तद्वाङ्मयं क्वापि हितं परोक्षवत् ततः समन्तात् प्रचरन्ति वाङ्मयाः।
प्राणा ऋणाख्याः प्रथिता भवन्ति ते वीध्रे सदा काच इवाक्ष्णि बिम्बिताः॥ - Ibid., 62
अक्षिस्थबिम्बेन युतं मनो मे तद्बिम्बरूपे परिणाममेति।
तद्रूपमक्ष्णाश्चरदात्मनि स्वे विधार्य्यते शीर्षणि सास्य दृष्टिः॥ - Ibid., 63

450. बहिर्जगद् वाङ्मयमेतदित्थं देशे बहिः क्वापिहितं ततोऽभूत्।
अन्तर्जगन्नाम मनोमयं तच्छीर्षाक्षिदेशस्थमतोऽन्यदेतत्॥ - Ibid., 64

Architectural designs are of two types. One is the design of a building which comes first is our concept or internal world; then we construct it in the outer world. The other is the imitation of natural object like tree. Here the object exists in the external world first and then it goes into our concept. Thus we can have a clear idea of internal and external world.[451] Realism is logical. Mind also requires some basis to create a concept.[452] Mind cannot create things always in the same way.[453] If things were mental creation, mind would not create unpleasant things.[454] The universe never perishes, even if people perish.[455] The objects appear to all in the same way.[456] All this goes to prove realism.

The conceptual world also exists like the external world.[457] There is co-ordination between the conceptual world and the external world.[458] In case of past and future things,

---

451. अपूर्वरूपप्रतिरूपभेदाच्छिल्पं द्विधान्तर्जगतो बहिस्तत्।
प्रणीयते चेत् तदपूर्वरूपं पूर्वं बहिस्तत्र न तादृशोऽर्थः।। - प्रकारान्तरेण जगद्वैविध्यम्, 69
452. अत्रोच्यते ज्ञानमिदं स्वतन्त्रं न दृश्यते तन्न यथेच्छकारि।
स्वतः स्थितं वस्त्वनपेक्ष्य किञ्चिन्न जायते ज्ञानमिदं कदाचित्।। - Ibid., 76
453. समुद्रशैलाद्यपि वर्षपूगैरेकत्र साम्याद् बहवो वदन्ति।
स्वाच्छन्द्यतोऽन्यान्यविधाप्रक्लृप्तौ न जीवसामर्थ्यमिह प्रतीमः।। - Ibid., 77
454. न केवल पश्यति नित्यमिष्टं सर्वत्र जीवो निजबोधमात्रः।
भूयांस्यनिष्टान्यपि पश्यतीति प्रत्येमि मूलं पृथगस्ति किञ्चित् - Ibid., 78
455. अहं च पुत्रश्च पिता च मित्रं शत्रुश्च मे भिन्नतयाऽवभान्ति।
केन्चिन्मृताः कश्चिदथो मरिष्यत्यथापि विश्वं न कदापि नश्येत्।। - Ibid., 83
एकस्य मृत्यावथवा विमोक्षे तज्ज्ञाननाशेऽपि न विश्वनाशः।
चैत्रे मृते मैत्रजगन्न नष्टं मृतेऽपि मैत्रे न जगद्विनश्यते।। - Ibid., 84
456. सामान्यतो ज्ञानमिदं यदस्ति तद्धि प्रमाणं न हि बाधमीक्षे।
तज्जीवसम्बन्धिजगद्विभिन्नं स्वतन्त्रमेकं जगदस्ति किञ्चित्।। - Ibid., 86
457. बहिर्जगत्त्वेव तदास्तु मास्तु स्वतोऽसदन्तर्जगदत्र किञ्चित्।
इति प्रपद्येत यदीह कश्चित् तस्मै ब्रुवेऽन्तर्जगतोऽपि सिद्धिम्।। - अन्तर्जगत्सिद्धिः, 87
458. स्पृष्ट्वा पदार्थं प्रतिपद्यते यं ज्ञानीयभावावयवास्तु तत्र।
स्पर्शक्रमेण प्रभवन्ति भाने तद्वद्भवेच्चक्षुषि युक्तिसाम्यात्।। - Ibid., 89

we see the conceptual world only and not the external world.[459] There can be no knowledge without co-ordination between conceptual world and external world. If there is some defect in the external world there is doubt in our mind.[460] There is a view that there is no necessity of union between senses and the external world because when many people see a thing it will be depleted, because every body, who sees it will be taking away a part of it.[461] Therefore, only the senses grasp the object.[462] Conceptual world does not exist independent of the external object.[463] We see only the concept of the object made on our mental screen.[464]

A question is raised that if *ātmā* is non attached, how can it take impression of external objects.[465] The answer is that when wind blows over the surface of the water,

---

459. भूतं भविष्यन्तमथासदर्थं श्रुत्वा तथा व्यक्तिविशेषरूपम्।
ज्ञानीयमन्तर्जगदेव पश्येद्बहिर्जगत् पश्यति नैष तर्हि॥ - Ibid., 90

460. तैलस्य दोषात्तु यथा प्रदीपज्योतिः क्व चास्फीतमभास्वरं स्यात्।
बाह्यार्थदोषान्मलिनं तथैवाज्ञानं भ्रमः संशय आविरस्ति॥
- अन्तर्बहिर्जगद्भ्यां ज्ञानोपपादनम्। तत्र बाह्यार्थभागान्वितप्रत्ययमतम्, 15

461. इत्येक आहुः पर आहुरंशद्वयं मिथोन्वेति न भातिसिद्ध्यै।
स्यादन्यथा द्रष्टृपरंपरायां सर्वांशिनाशादिदमर्थनाशः॥ बाह्यार्थघातजप्रत्ययमतम्, 97

462. तस्मात् करोति ध्रुवमिन्द्रियेऽस्मिन्नघातमेवैष बहिःस्थितोऽर्थः।
आहन्यमानेन्द्रियमेव शुद्धं यद्रूपमायाति विभाति तन्मे॥ - Ibid., 98

463. बहिर्न यत्रास्ति घटो न तत्रेच्छतोऽपि मे तत्स्थितिबुद्धिरस्ति।
बहिःस्थितेऽस्मिन् घटबुद्धिरुद्यान्ममेव सर्वस्य परस्य साम्यात्॥
- ज्ञानोत्पत्तौ बाह्यार्थस्य हेतुत्वम्, 104

464. किन्तु ध्रुवं तं न घटं बहिर्धा स्थितं प्रपश्यामि परोऽपि कश्चित्।
तत्रात्मसंयोगकृतं मदात्मस्फोटं नु पश्यामि तदात्मक्लृप्तम्॥ - Ibid., 105
बहिः स्वतन्त्राणि जगन्ति यावन्त्यायन्त्यहं ज्ञानधरातलेऽस्मिन्।
तावन्ति मे भान्ति मयि स्थितत्वान्न भान्ति तु ज्ञानतलाच्च्युतानि॥
- बाह्यार्थस्पर्शानुसारादात्मनि संस्कारः॥ 106॥

465. न स्पर्शयोग्योऽस्म्यहमित्थमाहुः केचित्तदज्ञानवशादसारम्।
बाह्यार्थदृष्ट्याहितसंस्क्रियाऽस्मिन् प्रत्यक्षमीक्षे मयि शिक्षयापि॥ - Ibid., 109

waves are produced in it but the water does not get bound to the wind. Similarly though *ātmā* has impressions of objects but it is not bound by them.[466]

As the contact of external object with *ātmā* is limited, the *jīva* gets only incomplete knowledge.[467] *Ātmā* by nature has infinite potentialities and it becomes finite because of desire. It can become omniscient.[468] The external world is as real as the conceptual world. The conceptual world exists in the self. Therefore all the three -- the knower, the knowledge and the object of knowledge -- are the self.[469] This is true of all the selves. These selves have one source from which they emerge and into which they merge. That source is God.[470] There is a question that if my knowledge supports the objects which I know, whose knowledge supports the whole external world. The answer is that the external world is supported by God.[471] The question that who supports the knowledge does not arise because knowledge is self supporting,[472] but the objects are to be supported by some knowledge.[473]

A side question is raised as to whether who creates the dreams. The answer is that the self creates the dreams. The question as to why the self should creates undesirable dreams, does not arise because the dreams are created according to one's *karma*.[474]

---

466. आहन्ति वायुर्जलमस्ति तस्माज्जले तरङ्गः कमपीह कालम्।
न सज्जते तत्र जलं तु वायौ विद्यात्तथात्मानमिमं पृथग्वत्।। - Ibid., 112
467. इन्द्रोऽयमात्मेन्द्रिवर्गमार्गादिवार्थवर्गं स्पृशति प्रतीकात्।
नास्ति स्वतन्त्रो बहिरर्थयोगे तस्मादपूर्णज्ञ इहास्ति जीवः।। - आत्मनि बाह्यार्थस्पर्शतारतम्यम्, 114
468. बाह्यांस्तु कामांस्तिरयन् यदान्तर्मुखो भवामि स्वयमात्मकामः।
सर्वज्ञतां यामि स सर्वकामः स्पृशन्नशेषान् मम शक्तिकामान्।। - Ibid., 116
469. जीवा अहं-प्रत्ययमात्ररूपाः स प्रत्ययः सर्वजगत्स्वरूपः।
पश्यामि यावज्जगदात्मभेदात् तद् द्रष्टृ वा दर्शनमेव वाऽहम्।। - अनन्तजीवाधारतयेश्वरसिद्धिः, 119
470. नश्यन्ति जीवाः प्रभवन्ति जीवा यत्रापियन्ति प्रभवन्ति यस्मात्।
तद्धाम किञ्चिद् ध्रुवमस्ति जीवास्तदाश्रयाः सन्ति स हीश्वरोऽस्ति।। - Ibid., 112
471. जगत्त्वसाधर्म्यवाशद्बहिर्धाऽप्याधारमावश्यकमस्य मन्ये।
अन्तर्जगद्वत् ध्रुवमस्य न स्याज्ज्ञानादृते काप्यपरा प्रतिष्ठा।। बहिर्जगदाधारतयेश्वरसिद्धिः, 124
472. ज्ञान निराधारमिदं यथा स्वे महिम्नि तिष्ठत्यपरत्र नास्ति।
तथा जगद्बाह्यमिदं स्थितं स्वे महिम्नि न स्वीक्रियते कुतो वा।। - Ibid., 126
473. ज्ञानं निराधारमिदं यथा मे तथा निराधारमिदं बहिः स्यात्।
इत्थं जगत् काल्पयितुं न शक्यं वैधर्म्यतो ज्ञानतदर्थपङ्क्त्योः।। - Ibid., 129
474. रामानुजः स्वप्नमयीं तु सृष्टिं वक्तीशमायाप्रभवामजैवीम्।
भ्रान्तं तदेषा त्विह जीवमायाक्लृप्तैव तत्कर्मवशात्त्वनिष्टा।। - Ibid., 132

We find that certain things take place according to a set order. This order is based on knowledge. This knowledge belongs to God.[475] The external world is created by God because *jīva* cannot create it.[476]

To conclude, *Īśvara* is the support of the *jīvas* as well as of the universe.[477]

## GOD

The knowledge of God is all pervading The orderly movement of planets in the sky, the down ward movement of water, the upward movement of *agni*, the formation of human bodies in an orderly way, all these indicates an all pervading knowledge which belongs to God.[478] Breathing continues even when we are asleep. This shows the part of God in us.[479] There is a co-ordination between working of different senses. It is because of knowledge of God. The co-ordination between the external world and the conceptual world is also because of the knowledge of God.[480]

---

475. देहस्य कालस्य निमित्तराशेर्यत्र व्यवस्थास्ति न चास्ति बाधः।

 तामैश्वरीं सृष्टिमिह प्रतीमो जैव्यां बहिर्भावविवशाद् व्यवस्था॥ - Ibid., 133

 सजीवविज्ञानविभिन्नमूलो जगत्प्रवाहोऽयमानाद्यनन्तः।

 यज्ज्ञानमूलस्तदिदं समस्तज्ञानाकरज्ञानमिहेश्वरोऽस्ति॥ - Ibid., 135

476. बहिर्जगद्योनिरयं तदित्थं सर्वेश्वरो नाभ्युपगम्यते चेत्।

 मज्ज्ञानमात्रेण यथेच्छसृष्ट्या सर्वत्र सर्वार्थविधा भवेयुः॥ - Ibid., 136

477. विश्वस्य सोऽयं प्रभवः प्रतिष्ठा परायणं तन्मयमेतदस्ति।

 जगत्ययं, तत्र, जगज्जगत्तत्, जगन्न तस्मात् पृथगस्ति किञ्चित्॥ - Ibid., 140

478. ग्रहा क्रमन्ते न चलन्ति ताराः स्थाने शरीरावयवा भवन्ति।

 तेजांसि यान्त्यूर्ध्वमधः पयांसि यत्तेषु सत्यं ध्रुवमीश्वरः स॥ ईश्वरीयपरिचयः, 143

479. जागर्ति जीवा मुहुरीहतेऽसौ प्राणाः क्रमन्ते मनसा नियुक्ताः।

 तस्मिन् सुषुप्ते तु यतो नियोगाच्चेष्टाः स्युरंशः स इहेश्वरः स्यात्॥ - Ibid., 144

480. तान्येव रूपाण्यपि तांश्च धर्मांस्तेषाममीषामपि चोपलब्धीः।

 एकं महाज्ञानमहं वदामि स ईश्वरः शाश्वतिकोऽद्वितीयः॥ - Ibid., 151

God has no physical body. He is pure knowledge.[481] Every thing goes on changing. The permanent substratum is God. He has no unful- filled desire.[482] The natural tendency of a sprout to go up is because of the desire of God.[483]

There are some points of difference between the individual self and God. The individual self is denoted by *aham* and God is denoted by *om*.[484] The individual self has a separate small body, God has the whole of the universe as his body.[485]

**SHEATHS**

Though both, the individual self and God have knowledge, yet individual self has four sheaths -- senses, mind, intellect and bliss. God has no sheaths.[486] Moreover the individual self can know only those objects that impinge on it, whereas God knows all objects. Animals also have a mind and intellect, but of an inferior quality.[487] God has no sheaths and has every thing in infinite measure.[488]

---

481. प्रश्नांस्तु यान् सृष्टिविधानकुर्वंस्तत्संभव: स्याद् यदि विश्वकर्ता।
मनुष्यवद् विग्रहवान् मित: स्याद् यद्यल्पशक्ति: प्रयतेत सृष्ट्यै।। - प्रश्नोद्धारसूत्रम्, 152

482. अनाप्तकामस्य तदर्थमिच्छा प्रजायते नायमनाप्तकाम:।
इच्छानिवृतिश्च तदर्थसिद्धौ सिद्धार्थ आत्मा किमर्थमिच्छेत्।। - Ibid., 157

483. वृक्षाङ्कुरो याति यदूर्ध्वमेषाऽप्यादौ तथा कामयते स काम:।
तदर्थसांमुख्यमथ प्रवृत्तिश्चेष्टेत्थमन्वर्थमयं क्रमोऽस्ति।। - Ibid., 161

484. ज्ञानस्य तस्येश्वरनाम्न एकस्योंशब्दतोऽस्ति व्यपदेश एवम्।
ज्ञानानि यानि त्वथ जीवनामाप्यहंपदेन व्यपदेश एषाम्। - अहंशब्दों शब्दाभ्यां व्यपदेशभेद:, 163

485. प्रत्यक्षमीक्ष्यं सकलं शरीरं तदन्तरे कारणमस्य गूढम्।
आत्मा हि स क्षुद्रतनौ स जीव: स ईश्वरो विश्वतनौ स एक:।।
- क्षुद्रशरीराभिमानित्व-विश्वशरीराभिमानत्वाभ्यां भेद:, 164

486. यदीन्द्रियं तत्र गतार्थमात्रा मतस्तदन्तश्च तदन्तरे धी:।
तदन्तरेऽहं विहरामि सोऽयं नित्यं चतुष्कोशगतोऽहमर्थ:।। - चतु:कोशत्वनिष्कोशत्वाभ्यां भेद:, 166

487. नात्मा पशूनामिति केचिदाहुर्न तत्र बुद्धिर्न मनोऽन्य आहु:।
एतन्नितान्तं भ्रममात्रमेषामपेक्षयाऽल्पत्वमवश्यमस्ति।। - Ibid., 169

488. अथेश्वर: कोशमपेक्षते न तं सोऽनन्तमात्रो न परैर्नियम्यते।
न तत्र बुद्धिर्न मनो न चेन्द्रियं स्वतन्त्र एवार्थचयं सृजत्ययम्।। - Ibid., 170

The knowledge of individual self is occasional whereas the knowledge of God is eternal.[489] Individual self dies, God does not die.[490]

Individual self has knowledge as *uktha* from which rays spread as *ark* and objects are grasped as *aśitī*.[491]

The desires are at the root of all activities. These desires create impression. When desire disappear individual self merges with God.[492] God, on the other hand, has no desire. His knowledge spreads in all direction.[493]

The origin of individual self is God, but God has no origin.[494] The concept of one individual self are not read by others but God is capable of reading the minds of all individual selves.[495] Individual selves are many having different moods and different reactions. God is one.[496] The individual self is awake, dreams and sleeps. In dream he creates both the unconscious and conscious things. In the waking state he can create only

---

489. ज्ञानं तु योऽत्रानुभवो विवेकोऽप्यहं गतं तन्न तदैश्वरं स्यात्।
नार्थग्रहव्यापृतिरैश्वरेऽस्मिन् नादेयहेयौ भवतश्च पूर्णे॥ - कादाचित्कज्ञानत्वनित्यज्ञानत्वाभ्यां भेदः, 171

490. अर्थाः स्वभावात् परिवर्त्य रूपा रूपान्यथात्वे व्यपयन्ति जीवाः।
जीवास्त इत्थं क्षयिणोऽप्यनन्ता य ईश्वरः सत्वविनश्वरः स्यात्॥ - विनाशित्वाविनाशित्वाभ्यां भेदः, 172

491. अन्तःत्थमुक्थं परितः समन्तादर्चंश्चरन्यस्य विकस्वरोऽर्कः।
अशीतिरर्केऽस्ति तदन्नभूता त्रिवृत्स्वरूपोऽस्ति ततः स जीवः॥
- अनुक्थत्वेश्वरजन्योक्थत्वाभ्यां भेदः॥ 173॥

492. आत्मा यथा कामयते तथाऽस्मिन्नुदेति रूपं तदमुष्य कर्म्म।
कामो जगत् काममयः स आत्मा सोऽप्येत्यकामोऽन्नमतोऽस्य सोऽस्ति॥ - Ibid., 176

493. य ईश्वरो नित्यमयं सकामः स सर्वकामोऽस्य हि कोऽपिकामः।
धीर्नाम जीवोक्थमिहोदितं स्याज्जीवं चिदाभासगतो वदामः॥ - Ibid., 177

494. जीवोक्थमित्थं ध्रुवमैश्वरः स्यात् कामो न तत्संभवतीश्वरेऽस्मिन्।
तस्मादनुक्थः परमेश्वरोऽसौ सर्वज्ञ एषोऽस्ति च सर्वशक्तिः॥ - Ibid., 178

495. सर्वेऽपि जीवा निजधीस्थमर्थं गह्णन्ति नान्याशयदृष्टमर्थम्।
तदीश्वरज्ञानगतं तु सर्वेऽविशेषतस्तेन स जीवभिन्नः॥
- असर्वजीवग्राह्यार्थत्वसर्वजीवग्राह्यार्थत्वाभ्यां भेदः, 180

496. नाना तु जीवा व्यवहारभेदाद् यथावधेया न तथेश्वरेऽपि।
नानात्वलिङ्गं किमपि प्रपद्ये तेनेश्वरज्ञानमिदं सदैकम्॥ - नानात्वैकत्वाभ्यां भेदः, 181

unconscious things. In the deep sleep he creates nothing. God can create both unconscious and conscious things.[497] Some hold that deluge is the sleeping state of God, where as the creation is his dreaming state. Liberation is his waking state.[498] Individual self is bound to God but God is not bound to individual self.[499] No part of universe is outside God but He is not affected by the universe, just as space contains air but is not affected by it.[500] Conceptual world is within the individual self, it disappear with him. The condition of one individual does not affect the other individuals.[501]

The external world is always there because it is the creation of God.[502] The individual self cannot modify the external world.

There is a view that knowledge and objects of knowledge are different. Knowledge is like light and objects are like darkness. They cannot be identical like the earth and the pot, nor can they be mixed like sugar and water.[503]

---

497. अचेतनं चेतनमित्थमेतज्जगद् द्विधास्तीश्वरजन्यमस्मिन्।
स्वप्ने तु जीवे द्विविधं प्रबोधे जडं सुषुप्तौ तु जगन्न किञ्चित्॥ - व्यवस्थत्वैकरसत्वाभ्यां भेदः, 182

498. केचिद्द्विदुर्जीववदीश्वरेऽपि स्युस्ता अवस्था इति तर्कयामः।
सुषुप्तिकल्पः प्रलयोऽद्य सृष्टिः स्वप्नोऽस्ति जाग्रत्यथ जीवमुक्तिः॥ - Ibid., 183

499. इयान् विशेषस्त्विह वर्तते यज्जीवात्मक्लृप्तोऽखिलभूतसंघः।
परेश्वरेऽस्त्येव स पश्यतीमान् जीवात्मभूतत्त्वमुपैति नेशः॥ - ईश्वरवृत्तित्व-जीववृत्तिभ्यां भेदः, 185

500. वायुर्यथाकाशगतः समन्ताद् व्याप्नोति खं किन्तु न सज्जते खम्।
तथेश्वरस्थः स हि भूतसंघः किन्त्वेषु नासज्ज्यत ईश्वरोऽयम्॥ - Ibid., 189

501. जीवात्ममूलं हि तदान्तरं जगज्जीवात्मनो विग्रहणे निगृह्यते।
दीपे प्रसन्ने चलिते तिरोहिते तद्भाः प्रसीदेत् प्रचलेत् तिरोभवेत्॥
- ईश्वरजगति जीवजगतोऽनुरोधाभावः, 197
एकत्र दीपे विकृतेऽपि दीपान्तराणि सुस्थानि न विक्रियन्ते।
एकत्र जीवे विकृतेऽपि जीवान्तराणि सुस्थानि न विक्रियन्ते॥ - Ibid., 198

502. बहिर्जगत्त्वीश्वरबोधक्लृप्तं तच्च स्वमूलेश्वरशाश्वतत्वात्।
स्थानाच्च्युतिं नैति नवोपरामं न वा मदिच्छाकृतमन्यथात्वम्॥ - Ibid., 199

503. तन्त्रस्य मैत्रादिविभिन्नजीवात्मनां न तत्र प्रसरोऽस्ति तस्मात्।
सुषुप्तिमूर्च्छामृतिकश्मलेऽपि सुस्थेऽपि मैत्रे जगदेकरूपम्॥ - Ibid., 200

The other view is that objects are superimposed on knowledge just as a serpent is superimposed on the rope. The objects are, therefore, unreal; only knowledge is real.[504] Just as darkness is the reason of superimposition of serpent on rope, similarly *māyā* is the reason of superimposition of objects on knowledge.[505]

One view is that since objects are of the nature of knowledge, they cannot be illusion; they are real.[506] The opponent to this theory say that objects appear different from knowledge. Objects exist even when we do not know them and there are objects like blueness of sky which don't exist even if we know them.

The fact is that all objects arise out of knowledge and are sustained by it.[507] External world is but a concept like the internal world. External world is but the creation of God's knowledge.[508] Just as in dream one knowledge creates many objects, similarly one knowledge can create many objects of the world. In fact objects reach us only in our knowledge. The separation of objects is due to name, form and activities. Knowledge knows all names, forms and activities.[509] If we remove name, form and activities, which are inter-woven in object, the knowledge also disappears.[510]

---

504. सर्पस्य रज्जोश्च मिधो विवेकाग्रहोऽयमध्यास इति स्म केचित्।
रज्जावसत् पन्नगधर्मधीर्वा देशान्तरीया हि मतिस्तथा वा॥ - Ibid., 204

505. मायावशात् सर्वजगत्प्रवृत्तिर्मायात्वविद्या स्वत एव जाता।
अत्यद्भुताऽनिर्वचनीयरूपेत्येकं मतं तन्न विशिष्य हृद्यम्॥ - Ibid., 208

506. परे तु तत्राहुरिमेऽखिलार्था भान्तीति न ज्ञानविनाकृता: स्यु।
ज्ञानं यत: सत्यमिमेऽपि तस्मात् सत्या: स्युरेते न कदापि मिथ्या॥
- विषयाणां ज्ञानात्मकत्वादेकसत्तावाद:, 209

507. ज्ञानं हि तेषां प्रभव: प्रतिष्ठा परायणं तेन ततो न भिन्ना:।
ज्ञानस्य हि ज्ञानमिमे विना तैर्न ज्ञायते ज्ञानमिदं कदाचित्॥ - Ibid., 210

508. ज्ञानैकतायां यदनेकतेयं जगत्तदाहु: स हि तद्विवर्त:।
अन्तर्जगद्वच्च बहिर्जगत्तज्ज्ञानाद्विभिन्नं न कदाचिदस्ति॥ - Ibid., 211

509. ज्ञानस्य कर्माणि ततोऽत्र रूपाण्येषां च नामानि पृथक् प्रतीमः।
उन्मुच्य धर्मान्न कदापि धर्मी संभाव्यते तेन तदेकमस्ति॥ - Ibid., 212

510. यदत्र नानात्वमिदं तु तस्य स्वरूमेवास्ति तदस्य कर्म्म।
वीचिर्जले वाससि चित्रवर्णेऽन्तर्द्वैतवानद्वयवत् प्रसिद्ध:॥ - Ibid., 215

The existence of the universe is borrowed from *brahman*. Therefore, there is non-dualism in reality.[511]

The universe is like the waves in the ocean of *brahman*.[512]

## WORSHIP

Because of the piling of energy on consciousness, there is a knot in the centre.[513] When piling of energy increases the *rasa* content of *ātmā* decreases. It is called *citi*. When on the other hand, a ball is thrown after travelling a certain distance, the energy gets lost. There is opening of the knot.[514]

*Ātmā* becomes limited because of this knot. When this knot is released, the *ātmā* again becomes limitless.[515] *Ātmā* in bondage is ignorant. If the bondage is severe, it becomes unconscious.[516]

The first bondage leads to *manas*, the second to *prāṇa* and the last to *vāk*.[517] If the bondage continues *vāk* becomes *vāyu*. *Vāyu* becomes *agni*, *agni* becomes water and water becomes *pṛthavī*.[518] The earth gives rise to trees. In the reverse process they get back to

---

511. द्वैतं तु सत्तान्यतयैव मन्ये सत्तैकतायां बहु चैकमस्ति।
उष्णीषबन्धम्वरतन्तुतूलानैक्येऽपि मूर्ध्न्येक इवायमर्थः॥ - Ibid., 216

512. तृणं यथा रूपमपैति दुग्धं ज्ञानं तथा नैति विकारभावम्।
यथा समुद्रे बहवस्तरङ्गा नानाविधास्तद्वदिदं जगत् स्यात्॥ - Ibid., 220

513. एकत्र बिन्दौ कतिचिद्बलानीतरेतरेण ग्रथितानि चेत् स्युः।
हृद्ग्रन्थिरेष प्रथितस्ततोऽसावात्मा रसो बद्ध इवावभाति॥ - आत्मनि हृद्ग्रन्थिवशाद् बन्धप्रकारः, 272

514. हृद्ग्रन्थिमोकेन च बन्धमोकः स्यादात्मनस्तत्र रसो निसर्गात्।
स्वयं स बद्धः स्वयमेव मुक्तो जगत् कदाचित् स कदाचिदात्मा॥ - Ibid., 275

515. यदस्त्यखण्डं विभु चैकरूपं बन्धान्मितिं प्राप्य तु तत्र खण्डाः।
यथा यथा चैध विमुक्तिमेयात् तद्ग्रन्थिभेदात् स विकासमेयात्॥ - Ibid., 276

516. अल्पज्ञतां याति शरीरबन्धादत्यन्तबन्धाज्जडतामुपैति।
बद्धं पुनर्बन्धमुपेत्य बन्धं पुनः पुनश्चेल्लभते जगत्तत्॥ - Ibid., 278

517. मनो यदि प्राणगतिं प्रपन्नं वाक्त्वं गतं स्थूलदशामुपैति।
तल्लीयते तेन विचित्तता स्यात् प्राणे श्लथे स्यादिह पारवश्यम्॥ - Ibid., 279

518. प्राणादियं वाक् प्रथमे तु बन्धे वागन्यबन्धाद् भवतीह वायुः।
वायुः पुनर्बन्धमुपेत्य तेजो बन्धाज्जलं तत् पृथिवी च बन्धात्॥ - Ibid., 281

*prāṇa*.[519] The way to get rid of bondage is *upāsanā*.[520] By *upāsanā,* the individual self gets Godhood. *upāsanā* means sitting near God.[521]

The individual self is restless because it is confined to body, but the mind of God is quiet. If the self fixes his mind on God, then his mind also becomes quiet.[522] The power of God passes on to him.[523]

Since God is constituted by knowledge, action and object, He can be approached by knowledge, action and devotion.[524] *Karma Yoga* means doing good to others without expecting any thing for the self.[525]

**DEVOTION**

Whatever the individual self does is meant for God just as whatever is done by a limb is meant for the whole body. The universe is the body of God and any service to any body becomes service to God. If one makes the nature more useful to society, this is his contribution. This is also a kind of devotion.[526] Technological development makes

---

519. पृथ्वी च बन्धादिह वृक्षपत्रं बन्धाच्च बन्धो मुहुरित्थमेति।
भवेत् कथंचित् क्रममुक्तिरेषां पृथ्वी पुनः प्राणिवधामुपैति॥ - Ibid., 282

520. जीवस्तु नात्यन्तमयं प्रबद्धः स्फुटं स विज्ञानमयोऽत्र दृष्टः।
तथापि देहे ध्रुवमेव बद्धः प्रतीयते पाप्मनि मानयोगात्॥ - बन्धमुक्त्युपायक्रियाया उपासनात्वम्, 283

521. जीवात्मकज्ञानमुपास्तियोगात् तदीश्वरज्ञानसमत्वमेति।
बन्धस्य तस्मिन् पुनरप्रसक्तेर्न जीवतामेति स एकरूपः॥ - Ibid., 286

522. मनोऽस्ति जीवस्य तु चञ्चलं स्थिरं शान्तं नितान्तं परमेश्वरस्य तत्।
स्थिरीकृतं वृत्तिनिरोधतो मनो जीवस्य योगं लभते परेश्वरे॥
- ऐश्वरमनसि जैवमनः स्थिरीकारस्योपासनात्वम्, 288

523. यो येन योगं लभते ध्रुवं तयोरूने भवेत् पुष्कलधर्मसंक्रमः।
उपास्यशक्तिध्रुवमत्र संचरत्युपासके साधु स चेदुपास्यते॥ - Ibid., 291

524. योगस्त्रिधा कर्ममुखेन, भक्त्या, ज्ञानेन कर्मास्ति महत्त्वहेतुः।
भक्तिः सुसाधाथ तृतीयमेषां जीवस्य तस्येश्वरसाष्टर्य्यहेतुः॥ - Ibid., 292

525. न स्वार्थमिच्छन् न परार्थमिच्छन् निष्कारणं यद्विदधाति कर्म।
सामान्यतः सर्वजनस्य स्याद्धितावहं नाम स कर्मयोगः॥ - Ibid., 293

526. वनोदयः प्राकृतधर्म ऐशे तन्त्रे निविष्टः स हि शिल्पयोगात्।
आरामतामेति तदित्थमैशे स्वबुद्धियोगोऽस्ति स भक्तियोगः॥ - आत्मापर्णारूपा प्रपतिर्भक्तियोगः, 298

the universe more prosperous. This is also devotion.[527]

Love softens the mind. When it is directed towards the seniors, it is called *śraddhā,* towards juniors it is *vātsalya.* Love between two parties of equal status is *sneha. Kāma* means love towards conscious and unconscious both. In love the mind is bound to the object of devotion. In *śraddhā* it takes the form of God.[528] In love one is entangled in *rajoguṇa.* In love there are two.[529] The highest stage of love is *śraddhā.* This is *parā bhakti.*[530] By a constant practice of *śraddhā,* one can have direct perception of God.[531]

**KNOWLEDGE**

If we know the real nature of things it is *jñānopāsanā.*[532] If we understand *ātmā,* we understand everything.[533] The reality of world, self and God is relevant for *upāsanā,* but in the field of knowledge we have only one truth which is knowledge.[534] Objects of

527. जीवस्थभावोऽस्य बहिर्जगत् तन्मृद्ग्रावतूलादिभिरैशभावैः।
भक्त्या युतं बाह्यजगद्गतं स्यात् वासोघटाद्यं स हि भक्तियोगः॥ - Ibid., 300

528. उपासनं तद् द्विविधं प्रपद्येऽवरं परं चेति मनोविशेषात्।
स प्रेम यत्रास्ति मनोऽवरं तत् परं तु स श्रद्धमनः कृतं स्यात्॥
- अपरा भक्तिः प्रेम्णा, परा भक्तिः श्रद्धया॥ 302॥

529. प्रेमा मनोबन्धनहेतुरस्मान्नाद्वैतसंपत् परदेवतायाम्।
आनन्दमत्रानुभवत्ययं नानन्दः स्वयं स्यादवरं ततस्तत्॥ - Ibid., 306

530. प्रेमा यदैति स्वयमातिशय्यं श्रद्धा तदा रूपमुदेति भिन्नम्।
तद्रूपवत् तत्र मनः स्थितं स्यान्न प्रेमवत् तत्र मनोऽस्ति बद्धम्॥ - Ibid., 308
श्रत्सत्यमाहुर्विषयास्तिताया अबाधिताया ग्रहणं दृढं चेत्।
तदन्यथात्वग्रहणातिरेकाच्छ्रद्धानमुक्तं मनसः प्रतिष्ठा॥ - Ibid., 309

531. मनो भवेत् यद्विषयस्वरूपं तस्यात्मनोऽप्यत्र तथा स्थितिः स्यात्।
श्रद्धामयोऽयं पुरुषोऽस्ति तस्माद् यच्छ्रद्ध एषोऽस्ति स एव सोऽस्ति॥
- श्रद्धोपासनायाः समानप्रत्ययप्रवाहरूपत्वम्, 315

532. ये ये पदार्था जगति प्रसिद्धाः प्रत्यर्थमेषां पृथगस्ति विद्या।
विद्या जगत् तत् परमेश्वरस्थं तत्प्रेक्ष्य साक्षात् कुरुते परेशम्॥ - ज्ञानयोगस्वरूपम्॥ 317॥

533. आत्मानमेकं यदि कोऽपि विद्याद् यथार्थतः सर्वजगत् स विद्यात्।
साक्षात्कृतस्तेन महेश्वरः स्यात् स एक भूतोऽत्र परात्मनि स्यात्॥ - Ibid., 319

534. इत्थं त्रिसत्यं प्रवदन्ति सन्तः सन्तोषमायान्ति तु तत्र नान्तः।
परे महान्तः प्रतिजानते ते सत्यं हि संभाव्यत एकमेव॥ - जगज्जीवेश्वराणां त्रित्वनिरासः, 1

knowledge are only modified form of knowledge.[535] According to this theory the self and knowledge and the object of knowledge are the same.[536] The light of self goes on all sides. It has two aspects, *citya amd citenidheya,* which are known as *antaḥpṛṣṭha* and *bahipṛṣṭha* respectively. Just as these two are not different, similarly knower and knowledge are not different.[537] Conceptual world is not different from knowledge. Both of them are one.[538]

The question arises as to whether the knowledge and the object of knowledge have the relation of separation like father and son or of identity like milk and curd. The fact is that there is identity-cum-difference relationship between knowledge and object of knowledge.[539] There is no existence of object without knowledge.[540]

Knowledge is real. The existence of universe depends on it.[541] The conceptual world is only knowledge, therefore knowledge is the only reality.[542]

To this there is the objection that objects appear different from knowledge. If objects were projection of mind every body would see an object differently and not in the same way. It means that objects exists independent of knowledge. Therefore we get the

---

535. ज्ञानात् पृथग् ज्ञेयकुलं तदित्थं प्राहुस्त्रिसत्या न तथा तु विद्मः।
ज्ञानादभिन्नः खलु तद्विवर्तः स ज्ञेयवर्गो न पृथक् पदार्थः॥ - Ibid., 3

536. अथ प्रमाता प्रमितिः प्रमेयं जीवात्मक्लृप्तं त्रयमत्र रूपम्।
तत्र प्रमातुः प्रमितिर्न तावत् प्रभिद्यते बिम्बविकाशरूपा॥ - प्रमितेः प्रमात्रा भेदाभावः, 8

537. ज्योतिर्धनाज्ज्योतिरिदं पृथग्वत् प्रतीतमप्यस्ति न तद्विभिन्नम्।
स्वं मण्डलं बाह्यमथान्तरं च द्विधा विभज्य प्रतितिष्ठतीदम्॥ - Ibid., 10

538. यदत्र पश्यामि किमप्यवैमि तदस्ति सर्वं मम बोधक्लृप्तम्।
आत्मैव तद्रूपमगात् कथं स्वं स्वस्मिन् गतं स्यात् तदभिन्नमेतत्॥ - अथ जीवान्तर्जगतोरैक्यम्, 14

539. तत्रापि च त्रैधमिदं प्रसक्तं ज्ञानात् पृथक्सत्ततया प्रजज्ञे।
ज्ञेयं पिता पुत्रवदुद्भूतं वा तदेकसत्तं दधिदुग्धवद्वा। - ज्ञेयस्य ज्ञानस्वरूपत्वम्, 17

540. ज्ञाने पृथक्सत्ततयाऽऽहितं तज्ज्ञानातिरेके जगदस्त्यसत्यम्।
ज्ञानस्य रूपं हि तदात्मलाभो ज्ञानातिरेकेण पृथङ् न तेषाम्॥ - Ibid., 21

541. ज्ञानं तु सत्यं जगतः स आत्मा दिग्देशकालैस्तु न मीयते सः।
अस्यानवच्छिन्नतयाऽऽत्मनोऽर्थास्तादात्म्यभूताः प्रतिभान्ति बोधे॥ - Ibid., 23

542. इत्थं यदन्तर्जगदस्ति तन्मे ज्ञानं तदेवाहमिति प्रसिद्धम्।
ज्ञानं हि मद्रूपमथास्य विश्वं मज्ज्ञानरूपं तदभिन्नमेकम्॥ - Ibid., 25

knowledge of objects only when they are presented to us.[543] Moreover knowledge has three stages; it is only in the waking state that we know objects. If objects were knowledge only, there would be knowledge of objects in sleep also.[544] More over objects in dream are not the same as in the waking state, all this prove that objects are different from knowledge.

The mind of God pervades *paramākāśa* whereas the mind pervades *daharākāśa.* Just as external world exist in *paramākāśa,* internal world exists in *daharākāśa.*[545]

The knowledge of God which is limitless is indicated by *Om.*[546] In fact we do not see the external world but only its reflection on our mental screen. The reason is that the external world is not different from knowledge of God.[547] The external world is limitless like the knowledge of God.[548]

The self and God are the same. There is no place where self can establish itself independently of God, because God is all pervading.[549] Just as reflection of sun produces its image on water, similarly God is reflected in the self.

---

543. अत्राहुरेके किल संभवेदिदं नेक्ष्येत यद्यर्थगणस्वतन्त्रता।
यद्यात्मनि द्रष्टरि दृश्यसंनिधावसंनिधौ वा न विशेष उद्भवेत्॥ - ज्ञेयस्य ज्ञानरूपत्वे आक्षेपः, 26

544. ज्ञानाद्यदि ज्ञेयकुलं न भिद्यते प्रजागरस्वप्नसुषुप्तयस्तदा।
न संभवेयुः क्वचिदात्मनो दशा अर्थान्वयानन्वयतस्तदुद्भवाः॥ - Ibid., 27

545. यथा बहिर्धा जगदाश्रयायाकाशो बहिर्धा किल भूमिकास्ति।
अन्तस्तयान्तर्जगदाश्रयायाकाशो मनो नाम च भूमिकास्ति। - तदाक्षेपनिरासः, 32

546. तथैव विज्ञानघनः स ओमिति प्रवर्तते मध्यगतस्तदाश्रितम्।
अनन्तवैज्ञानिकनित्यमण्डलं तन्मण्डले ज्ञानविजृम्भणं जगत्॥ - अथ ईश्वरबहिर्जगतोरैक्यम्॥ 40॥

547. ज्ञानं हि सत्यं जगतः स आत्मा दिग्देशकालैस्तु न मीयते सः।
अस्यानवच्छिन्नतयाऽऽत्मनोऽर्थास्तादात्म्यभूता इह सन्त्यदृष्टाः॥ - Ibid., 43

548. यतोऽमितत्त्वं तत एव चास्मिन्नानन्त्यमस्माच्च निराकृतित्वम्।
एकत्त्वमस्मादविशेषताऽस्मात् सतोऽसतो वा न स भिद्यतेऽर्थः॥ - Ibid., 49

549. न स्वे महिम्न्येष पृथङ्महेशाव्याप्तप्रदेशानुपलम्भहेतोः।
यदीश्वरे तर्हि जगद्वदेते जीवा अपि स्युर्जगदैतदात्म्यात्॥ - Ibid., 52

The rays coming out of knowledge become objects. Every individual has knowledge. The uppermost limit of this knowledge reaches in God.[550] Existence and knowledge represent God.[551] Existence, knowledge and blissfulness are one.[552]

When we dedicate ourselves to God it is devotion. If we serve God like a servant, it is devotion of lower type.[553] When one becomes one with God, it is higher type of devotion.[554] It is only at this stage that all doubts are removed.[555]

❑❑❑

550. एकस्य मज्ज्ञानमतः परस्याधिकं तथान्यस्य ततोऽधिकं च।
यतोऽधिकं नास्ति भवेद् ध्रुवं सा मात्रा पराऽसो परमेश्वरोऽस्ति॥ - Ibid., 77

551. एकस्य मोदादधिकः परस्य ततः परस्यापि ततः परस्य।
यतोऽधिको नास्ति भवेद् ध्रुवं सा मात्रा परासौ परमेश्वरोऽस्ति। - Ibid., 78

552. अस्तीति बोधोऽपि च सोऽस्ति बोधो रसः, स बोधोऽपि च बोद्धबोध्ये।
रसोस्ति, सत्तापि रसो, न चान्यन्मन्यामहे, तेन तदेकसत्यम्॥ - Ibid., 84

553. यदीश्वरे स्वात्मसमर्पणं धिया विधाय स्वातन्त्र्यधियं विमुःाति।
सोपासना तत्र च पीठिकात्रयी क्षुद्रैस्तु सेवा क्रियते प्रभोरिव॥ - उपासना, 87

554. यां भूतशुद्धिप्रतिपन्नया दिशा विलोप्य भूतप्रतिपत्तिमीश्वरे।
विलापयत्यात्मसमस्तविगूहं स ईश्वरीभावमुपैति योगतः॥ - Ibid., 92

555. भिद्यते हृदयगून्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे॥ - Ibid., 100